M

No. of Printed Pages : 12

# द्वितीय सङ्कलनात्मकं मूल्याङ्कनम् (सत्रम् 2011-2012)

## विषयः – संस्कृतम्

## कक्षा – X

**समयः – होरात्रयम्** **अङ्काः – 80**

**निर्देशाः –**

(i) प्रश्नपत्रे चत्वारः खण्डाः सन्ति।

| | | | |
|---|---|---|---|
| खण्डः 'क' | अपठित-अवबोधनम् | – | 12 अङ्काः |
| खण्डः 'ख' | रचनात्मकं-कार्यम् | – | 12 अङ्काः |
| खण्डः 'ग' | अनुप्रयुक्त-व्याकरणम् | – | 28 अङ्काः |
| खण्डः 'घ' | पठित-अवबोधनम् | – | 28 अङ्काः |

(ii) सर्वे प्रश्नाः अनिवार्याः।

(iii) प्रश्नानाम् उत्तराणि खण्डानुसारं क्रमेणैव लेखनीयानि।

(iv) प्रश्नसंख्या अवश्यमेव लेखनीया।

(v) उत्तराणि संस्कृतेन एव लेखनीयानि।

### खण्डः 'क'

**अपठित-अवबोधनम्** **(12 अङ्काः)**

1. अधोलिखितम् अनुच्छेदम् पठित्वा तदाधारितप्रश्नानाम् उत्तराणि संस्कृतेनैव लिखत –

'धर्म' इतिशब्दस्य अर्थं वयं सम्यक् नैव जानीमः। धर्मः उपासनापद्धतिः एव नास्ति। उपासनापद्धतिस्तु धर्मस्य कर्मकाण्डं भवति। महर्षिणा वेदव्यासेन महाभारते उक्तम – 'धर्म एव हतो हन्ति, धर्मो रक्षति रक्षितः।'

P.T.O.

एवं धर्मः नाम कश्चित् विलक्षणो गुणः। सूर्यस्य धर्मः अस्ति प्रकाशदानम् उष्णत्वप्रदानं च। यस्मिन् क्षणे सूर्यः इमं धर्मं त्यक्ष्यति तस्मिन्नेव क्षणे सूर्यः सूर्यः नैव भविष्यति। तर्हि मानवस्य कः धर्मः? मनुः ब्रूते – 'सत्यं ब्रूयात्, प्रियं ब्रूयात्।' एष एव सनातनः धर्मः।

(I) एकपदेन उत्तरत – 1 × 2 = 2

(i) उष्णत्वप्रदानं कस्य धर्मः अस्ति?

(ii) धर्मस्य कर्मकाण्डं किं भवति?

(II) पूर्णवाक्येन उत्तरत – 2 × 2 = 4

(i) यदि सूर्यः प्रकाशदानम् उष्णतादानं च त्यजेत् तर्हि किं भवेत्?

(ii) धर्मविषये महर्षिः व्यासः किं कथयति?

(III) निर्देशानुसारम् उत्तरत – 1 × 4 = 4

(i) 'जानीमः' इति क्रियापदस्य कर्तृपदं किम्?

(अ) वयम् (ब) सम्यक्

(स) अर्थम् (द) धर्मः

(ii) 'धर्मो रक्षति रक्षितः' इति वाक्ये विशेषणपदम् किम्?

(अ) रक्षति (ब) हन्ति

(स) एव (द) रक्षितः

(iii) 'संग्रहीष्यति' इत्यस्य विलोमपदं किमत्र?

(अ) भविष्यति (ब) त्यक्ष्यति

(स) नास्ति (द) ब्रूते

(iv) 'कथयति' इत्यस्य पर्यायपदं किं प्रयुक्तम् अत्र?

(अ) उक्तम् (ब) ब्रूयात्

(स) ब्रूते (द) त्यक्ष्यति

(IV) अनुच्छेदस्य कृते समुचितं शीर्षकं देयम्। 2 × 1 = 2

## खण्डः 'ख'

### रचनात्मकं कार्यम् (12 अङ्काः)

2. भवान् सोमेशः। विद्यालयस्य दशमकक्षायाः छात्राणां दीक्षान्तकार्यक्रमविषये विदेशस्थं पितृव्यं प्रति लिखिते पत्रे रिक्तस्थानानि मञ्जूषास्थपदैः प्रपूर्य पत्रम् उत्तरपुस्तिकायां पुनः लिखत। ½ × 8 = 4

शृङ्गेरीतः

तिथिः.....................

(i)....................पितृव्यचरणेषु,

सादरप्रणिपातानन्तरं (ii)....................यत् ह्यः एव मम विद्यालये दशमकक्षायाः छात्राणां (iii)....................सम्पन्नः। प्रत्येकं छात्रस्य पितरौ अपि अनिवार्यतया उपस्थितौ आस्ताम्। सर्वप्रथमं (iv)....................अभवत्। तदनन्तरं वेदिकायाः चतुर्दिशम् दशमकक्षायाः प्रत्येकं छात्रः स्वगृहात् (v)....................दीपकं प्रज्वालितवान्। पश्चात् स्वपितरौ वन्दित्वा गुरूणाम् आशीर्वादान् स्वीकृत्य च स्वस्थाने (vi).................... ।

एकः अध्यापकः 'सत्यं वद। धर्मं चर।....................' इत्यादि श्रुतिवाक्यानि अपठत्। प्रधानाचार्यमहोदयानाम् उपदेशैः सह कार्यक्रमस्य समापनमभवत्। संप्रेरिताः वयं सम्प्रति (vii)....................तल्लीनाः। परीक्षानन्तरं पुनः लेखिष्यामि।

भावत्कः भ्रातृजः

(viii).....................

| मञ्जूषा – दीक्षान्तकार्यक्रमः, उपविष्टः, सोमेशः, यज्ञः, निवेद्यते, समादरणीयेषु, अध्ययने, आनीतम् |
|---|

3. मञ्जूषायां प्रदत्तशब्दानां सहाय्येन चित्राधारितानि चत्वारि वाक्यानि संस्कृतेन लेखनीयानि – 2 × 4 = 8



| |
|---|
| **मञ्जूषा** – छात्राः, अध्ययनं, उपनेत्रम्, कलमम्, लैपटॉपयन्त्रम्, मञ्चे, आसन्दिकाः, कुर्वन्ति, पश्यन्ति, स्वस्वकार्यम्, ध्यानेन, पश्यन्ति, प्रत्येकम्, अपि, समाधानम्। |

**अथवा**

'मम संस्कृतपुस्तकम्' इति विषयमधिकृत्य संस्कृतेन चत्वारि वाक्यानि लिखत। सहायतार्थम् अधः मञ्जूषास्थपदानि अपि पश्यत – 2 × 4 = 8

| |
|---|
| **मञ्जूषा** – कथाः, पठामि, रोचन्ते, सुभाषितानि, श्लोकाः, प्रेरणा, ग्रन्थेभ्यः, सुष्ठु, प्रश्नाः, विचाराः, पाठयन्ति, अपि, अध्यापिकाः, च, चरित्रम् |

**खण्डः 'ग'**

**अनुप्रयुक्त-व्याकरणम्** **(28 अङ्काः)**

4. अधोलिखितवाक्येषु रेखाङ्कितपदानां यथोचितं संधिं विच्छेदं वा कुरुत – 1 × 4 = 4

(i) पश्य इदं सुन्दरं <u>भवनम्</u>।

(ii) <u>सु + आगतम्</u> अत्र भवताम्।

(iii) अयं जगत् + नाथः प्रणम्यः।

(iv) पाण्डवास्त्वं च राष्ट्रं च सदा संरक्ष्यमेव हि।

अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत – 1 × 6 = 6

(i) यावत् असौ क्रूरकर्मा न दण्ड्यते.......... ।

(अ) क्रूराणि कर्माणि यस्य सः (ब) क्रूराय कर्मणे

(स) क्रूरश्च कर्म च (द) क्रूराः कर्माः इति

(ii) काकः – (प्रविश्य, सक्रोधम्) आः किमुक्तवती भवती ?

(अ) स्वल्पन क्रोधेन (ब) क्रोधस्य पश्चात्

(स) क्रोधेन सहितम् (द) क्रोध कृत्वा

(iii) को भेदः पिककाकयोः ?

(अ) पिकयोः काकयोः वा (ब) पिकः काकस्य च

(स) पिकेषु काकेषु च (द) पिकः काकः च, तयोः

(iv) पश्चात्तापेन दग्धं मानसं यस्य सः उच्चैः अक्रन्दत्।

(अ) दग्धमनाः (ब) दग्धमानसः

(स) मानसदग्धः (द) दग्धमानः

(v) ततः प्रविशतः व्यासश्च नारदश्च।

(अ) व्यासनारदौ (ब) व्यासनारदाः

(स) नारदव्यासौ (द) व्यासश्चनारदौ

(vi) किमिदं रूपस्य योग्यं साधुजनस्य ?

(अ) रूपयोग्यः (ब) अपरूपम्

(स) स्वरूपम् (द) अनुरूपम्

P. T. O.

6. (क) अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृतिप्रत्ययौ संयोज्य विभज्य वा वाक्यानि लिखत – ½ × 4 = 2

(i) त्रैलोक्यं दहन् इव अग्निः सर्वत्र प्रसरति।

(अ) दह् + शानच् (ब) दह् + शतृ

(स) दह् + अन् (द) दहा + अत्

(ii) इत्युक्तिः तत् कृतज्ञता।

(अ) कृतज्ञ + तल् (ब) कृतज्ञ + ता

(स) कृतं जानाति इति (द) कृतज्ञ + त्व

(iii) कथं मन्दभाग्या अहं धैर्यं धारयामि।

(अ) मन्दभाग्य + अ (ब) मन्दभाग्य + टाप्

(स) मन्दभाग्य + तल् (द) मन्दभाग्य + ङीप्

(iv) बौद्धभिक्षूणां निवासयोग्या स्थल + ङीप् इयम्।

(अ) स्थला (ब) स्थले

(स) स्थल्यः (द) स्थली

(ख) अधोलिखितवाक्ययोः रेखाङ्कितपदयोः प्रकृतिप्रत्ययौ विभज्य वाक्ये पुनः उत्तरपुस्तिकायां लिखत – 1 × 2 = 2

(i) विद्यायाः महत्त्वं को न जानाति।

(ii) आचार्यं वन्दमानाः इमे छात्राः सन्ति।

7. अधोलिखितसंवादे मञ्जूषायां प्रदत्तैः समुचितपदैः रिक्तस्थानानि पूरयित्वा संवादम् उत्तरपुस्तिकायां लिखत – 1 × 6 = 6

राघवेन्द्रः – देवेन्द्र! 'पुस्तकालयस्य के लाभाः' (i)………………जानासि किम्?

देवेन्द्रः – (ii)………………आचार्येण उक्तम् (iii)………………"तत्र पुस्तकेषु महत् ज्ञानम् अस्ति" इति।

राघवेन्द्रः – परमहं पश्यामि यत् त्वं (iv)………………एव पुस्तकालयं गच्छसि।

देवेन्द्रः – परन्तु (v)………………मया प्रतिज्ञातं यत् प्रतिदिनं तत्र गमिष्यामि। एतावत् ज्ञानं तु अन्यत्र (vi)………………?

| |
|---|
| **मञ्जूषा** – साम्प्रतम, यत्, इति, कुतः, यदाकदा, ह्यः |

8\. (क) प्रदत्तेभ्य: विकल्पेभ्य: शुद्धं संख्यावाचकपदं चित्वा लिखत – ½ × 4 = 2

(i) ……………………देव: सर्वभूतेषु गूढ:।

(अ) एका (ब) एक:

(स) एकस्मिन् (द) एकम्

(ii) ……………………इमौ पुरुषौ लोके सूर्यमण्डलभेदिनौ।

(अ) द्वौ (ब) द्वे

(स) द्वयो: (द) द्वाभ्याम्

(iii) 'कृत-त्रेता-द्वापर-कलि' इति……………………युगानि सन्ति।

(अ) चत्वार: (ब) चतस्र:

(स) चतुर: (द) चत्वारि

(iv) नर:……………………इन्द्रियाणि संयम्य जीवनं जीवेत्।

(अ) पञ्चानि (ब) पञ्चभि:

(स) पञ्च (द) पञ्चसु

(ख) अधोलिखितवाक्ययो: संख्ययो: स्थाने संस्कृतसंख्यावाचि-विशेषणशब्दाभ्यां रिक्तस्थानं पूरयत – 1 × 2 = 2

(i) मया संस्कृतविषये ___(96)___ अङ्का: प्राप्ता:।

(ii) नक्षत्राणि ___(27)___ भवन्ति।

9\. अधोलिखितवाक्येषु रेखाङ्कित-अशुद्धपदानां स्थानेषु विकल्पेभ्य: शुद्धमुत्तरं चित्वा शुद्धवाक्यानि पुन: लिखत – 1 × 4 = 4

(i) भवत्य: तत्र अवश्यं <u>गच्छेम</u>?

(अ) गच्छेत् (ब) गच्छेताम् (स) गच्छेयु: (द) गच्छे:

(ii) वसन्तग्रीष्मौ इति द्वे ऋतू उत्तरायणे <u>आगच्छत:</u>।

(अ) द्वयम् (ब) द्वौ (स) द्वय: (द) द्वयो:

(iii) सर्वेऽपि सुखिनः अभवन् इति अस्माकं कामना।

(अ) सन्तु (ब) आसन् (स) सन्ति (द) भवेयम्

(iv) श्रीकृष्णस्य त्रीणि वचः श्रुत्वा अर्जुनः उवाच।

(अ) वचसः (ब) वचाः (स) वचानि (द) वचांसि

## खण्डः 'घ'

### पठित-अवबोधनम् (28 अङ्काः)

**10. अधोलिखित गद्यांशं-पद्यांशं-नाट्यांशं च पठित्वा तदाधारितप्रश्नानां सम्यक् उत्तराणि दीयन्ताम् –**

**3 × 4 = 12**

**(अ) गद्यांशः**

'वाङ्चो' जनजातीनां प्रमुखं 'ओरिया' इति अस्ति। एतत् तु 'फरवरी' इति मासे मान्यते। अस्मिन् अवसरे कृषिभूमिपूजनं सेतुनिर्माणं च सामाजिकं कार्यं क्रियते 'मोपीन' इति अपि कृषिपर्व अस्ति। देवानामपि देवः मोपीन' इति कथ्यते। होली सदृशम् एव पर्व इदम्। जनाः परस्परं मुखे कपोले च शालिचूर्णं लिम्पन्ति। इदम् अप्रैल' इति मासे मान्यते।

(I) एकपदेन उत्तरत – ½ × 2 = 1

(i) 'अप्रैल' इति मासे किं पर्व मान्यते?

(ii) देवानाम् अपि देवः कः कथ्यते?

(II) पूर्णवाक्येन उत्तरत – 1 × 1 = 1

'ओरिया' इति पर्वणि तत्रत्याः जनाः किं कुर्वन्ति?

(III) यथानिर्दिष्टम् उत्तरत – ½ × 4 = 2

(i) 'लिम्पन्ति' इत्यस्य कर्तृपदं किम्?

(अ) शालिचूर्णम् (ब) मुखे

(स) परस्परम् (द) जनाः

(ii) 'होलीसदृशम् एव पर्व इदम्' इतिवाक्ये विशेष्यपदं किम् अस्ति?

(अ) होलीसदृशम् (ब) एव

(स) पर्व (द) इदम्

(iii) 'आनने' इत्यर्थं किं पदम् अत्र प्रयुक्तम्?

(अ) मुखे (ब) कपोले

(स) मासे (द) अवसरे

(iv) 'एतत् तु 'फरवरी' इतिमासे मान्यते' अत्र एतत् सर्वनामपदं कस्मै प्रयुक्तम्?

(अ) 'वाङ्चो' इत्येभ्य: (ब) 'ओरिया' इति कृते

(स) 'फरवरी' इति कृते (द) मासाय

**(आ) पद्यांश:**

नानाशस्त्रविद: पूर्वे येऽप्यतीता: महारथा:।

नैतदस्त्रं मनुष्येषु तै: प्रयुक्तं कथञ्चन।।

(I) एकपदेन उत्तरत – ½ × 2 = 1

(i) पूर्वे के अतीता:?

(ii) पूर्वे: कीदृशा: महारथा: आसन्?

(II) पूर्णवाक्येन उत्तरत – 1 × 1 = 1

पूर्वै: महारथै: केषु कदापि च किं नैव प्रयुक्तम्?

(III) निर्देशानुसारम् उत्तरत – 1 × 2 = 2

(i) 'अतीता:' इत्यस्य विशेष्यपदं किं प्रयुक्तम्?

(अ) महारथा: (ब) नानाशस्त्रविद:

(स) प्रयुक्तम् (द) मनुष्येषु

(ii) अत्र 'तै:' इति पदं केभ्य: प्रयुक्तम्?

(अ) शास्त्रविद्भ्य: (ब) अतीतेभ्य:

(स) महारथेभ्य: (द) मनुष्येभ्य:

(इ) **नाट्यांशः**

बकः – (प्रविश्य, स्वपक्षौ अवधूय) किं ते महत्त्वम्? वर्षतौ तु मानसं पलायसे। अहम् एव अत्र वृष्टेः अभिनन्दनं करोमि। न जाने कथं माम् अपरिगणयन्तः जनाः चित्रवर्णम् अहिभुजं मयूरं राष्ट्र-पक्षी इति मन्यन्ते।

मयूरः – (प्रविश्य, साट्टहासम्) सत्यं सत्यम्। अहमेव राष्ट्रपक्षी। को न जानाति तव ध्यानावस्थाम्?

काकः – रे सर्पभक्षक! नर्तनात् अन्यत् किम् अपरं जानासि?

मयूरः – श्रूयताम् श्रूयताम्। मम नृत्यं तु प्रकृतेः आराधना।

(I) एकपदेन उत्तरत – ½ × 2 = 1

(i) वृष्टेः अभिनन्दनं कः करोति?

(ii) कस्य नृत्यं प्रकृतेः आराधना भवति?

(II) पूर्णवाक्येन उत्तरत – 1 × 1 = 1

हंसः वर्षतौ कुत्र पलायते?

(III) निर्देशानुसारम् उत्तरत – ½ × 4 = 2

(i) 'ते' इति सर्वनामपदं कस्मै प्रयुक्तम्?

| | |
|---|---|
| (अ) हंसाय | (ब) बकाय |
| (स) काकाय | (द) मयूराय |

(ii) 'चित्रवर्णम्' इति कस्य विशेषणपदम्?

| | |
|---|---|
| (अ) जनानाम् | (ब) अहिभुजस्य |
| (स) मयूरस्य | (द) 'राष्ट्रपक्षी' इत्यस्य |

(iii) 'जानाति' इति क्रियापदस्य कर्तृपदं किम्?

| | |
|---|---|
| (अ) राष्ट्रपक्षी | (ब) मयूरः |
| (स) कः | (द) ध्यानावस्था |

(iv) 'तत्र' इत्यस्य विलोमपदम् किमत्र?

(अ) कथम् (ब) अन्यत्

(स) एव (द) अत्र

11. अधोलिखितकथनद्वयस्य प्रसङ्गानुसारं समुचितं भावं प्रदत्तविकल्पेभ्यः चित्वा लिखत – 1 × 2 = 2

(I) आचारः प्रथमो धर्मः इत्येतद् विदुषां वचः।

(i) अन्ये धर्माः द्वितीयस्थाने आयान्ति।

(ii) धर्मस्य आचरणम् एव प्रधानम्।

(iii) विद्वांसः कथयन्ति यत् श्रेष्ठम् आचरणम् एव मानवस्य प्रथमः धर्मः अस्ति।

(iv) विदुषां मते आचारेण एव धर्मः ज्ञायते।

(II) आपदां तरणिः धैर्यम्।

(i) विपत्तेः पारं गन्तुं धैर्यम् एव नौका इव भवति।

(ii) धैर्येण एव नौका निर्मीयते।

(iii) विपत्तौ वतु नौका एव सुरक्षितं पारं करोति।

(iv) आपत्सु नौकाचालने धैर्यस्य आवश्यकता भवति।

12. अध:प्रदत्तश्लोकान्वयं मञ्जूषापदैः पूरयित्वा लिखत – ½ × 8 = 4

(I) त्यक्त्वा धर्मप्रदां वाचं परुषां योऽभ्युदीरयेत्।
परित्यज्य फलं पक्वं भुङ्क्तेऽपक्वं विमूढधीः।।

**अन्वयः** – यः धर्मप्रदां (i)............त्यक्त्वा (ii)............(वाचम्) अभ्युदीरयेत्। (सः) (iii)............पक्वं फलं (iv)............अपक्वं फलं भुङ्क्ते।

(II) विद्वांस एव लोकेस्मिन् चक्षुष्मन्तः प्रकीर्तिताः।
अन्येषां वदने ये तु ते चक्षुनामनी मते।।

**अन्वयः** – अस्मिन् (v)............विद्वांसः एव (vi)............कीर्तिताः। अन्येषां (vii)............, ये (चक्षुषी) ते तु (viii)............मते।

| **मञ्जूषा** – परुषाम्, वदने, विमुढधीः, चक्षुनामनी, चक्षुष्मन्तः, परित्यज्य, लोके, वाचम् |
|---|

**13.** अधोलिखितवाक्येषु रेखाङ्कितपदमाधृत्य प्रश्ननिर्माणं कुरुत – 1 × 4 = 4

(i) मुनिः गृहिणीं भिक्षाम् अयाचत।

(ii) इदं स्थानं रमणीयम् अस्ति।

(iii) जानीमः भवतः दिव्यां शक्तिम्।

(iv) अश्वत्थतरुमूले सुवर्णपूरितः कलशः विद्यते।

**14.** अधोलिखितवाक्यानि घटनाक्रमानुसारं पुनः लिखत – ½ × 8 = 4

(i) तस्याः कथनेन सः कृषिकार्यं प्रारभत

(ii) दुष्टबुद्धिः मित्रेण सह चौर्यार्थम् गतः।

(iii) परं स एव तत्र सर्पेण दष्टः मृतः च।

(iv) कर्मपुरे दुष्टबुद्धिनामा चौरः वसति स्म।

(v) प्रच्छन्नभाग्यः तु मध्ये एव गृहं प्रतिनिवृत्तः

(vi) दुष्टबुद्धिः मित्रं हन्तुं तद्गृहम् अगच्छत्।

(vii) सः प्रच्छन्नभाग्येन सह मैत्रीम् अकरोत्।

(viii) तस्य भार्या बुद्धिमती आसीत्।

**15.** प्रसङ्गानुसारम् उचितम् अर्थं विकल्पेभ्यः चिनुत – ½ × 4 = 2

(i) साधु पृष्टम्।

(अ) ऋषिः (ब) तपस्वी (स) सम्यक् (द) सज्जनः

(ii) वीरजननी त्वं शोचितुम् न अर्हसि।

(अ) विचारं कर्तुम् (ब) स्मर्तुम् (स) शोधयितुम् (द) शोकं कर्तुम्

(iii) अलम् अतिविकत्थनेन।

(अ) अति आत्मप्रशंसया (ब) अति परनिन्दया

(स) अतिकलहेन (द) अतिक्रोधेन

(iv) सर्वस्तरतु दुर्गाणि।

(अ) दुर्गमस्थानानि (ब) राजभवनानि (स) दुर्गामन्दिराणि (द) सङ्कटानि